# श्रीराम स्तोत्रम्

ॐ आपदा मपहर्तारं दातारं सर्व सम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ 1

आर्तानामार्ति हन्तारं भीतानां भीति नाशनम् ।
द्विषतां कालदण्डं तं रामचन्द्रं नमाम्यहम् ॥ 2

नमः कोदण्ड हस्ताय सन्धीकृत शराय च ।
खण्डिताखिल दैत्याय रामायाऽऽपन्निवारिणे ॥ 3

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ 4

अग्रतः पृष्ठतश्चैव पार्श्वतश्च महाबलौ ।
आकर्ण पूर्ण धन्वानौ रक्षेतां राम लक्ष्मणौ ॥ 5

सन्नद्धः कवची खड्गी चापबाण धरो युवा ।
गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ 6

अच्युतानन्त गोविन्द नामोच्चारण भेषजात् ।
नश्यन्ति सकला रोगास्सत्यं सत्यं वदाम्यहम् ॥ (3) 7

सत्यं सत्यं पुनस्सत्यं उद्धृत्य भुज मुच्यते ।
वेदाच्छास्त्रं परं नास्ति न देवं केशवात्परम् ॥ 8

शरीरे जर्झरीभूते व्याधिग्रस्ते कळेवरे ।
औषधं जाह्नवी तोयं वैद्यो नारायणो हरिः ॥ 9

आलोड्य सर्व शास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणो हरिः ॥ 10

यदक्षर पदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥ 11

विसर्ग बिन्दु मात्राणि पदपादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥ 12

कायेन वाचा मनसेन्द्रियैर्वा । बुद्ध्यात्मना वा प्रकृति स्वभावात् ।
करोमि यद्यत्सकलं परस्मै । नारायणयेति समर्पयामि ॥ 13